अग्रजातिः, पुं, (अग्रे जातिर्जन्म यस्य सः) (जन् + भावे क्तिन्) ब्राह्मणः। इति हेमचन्द्रः॥

अग्रणीः, त्रि, (अग्रे नीयतेऽसौ अग्र + नी + क्विप् अग्रग्रामाभ्याञ्च इति पाणिनिसूत्रेण णत्वं।) (वह्नौ च पुं, यथा चास्याग्रणीत्वं तथाग्निशब्दे निरुक्तव्याख्यायामुक्तम्) अग्रिमः। श्रेष्ठः। इति हेमचन्द्रः॥

अग्रतः, [स्] (अग्रे अग्र + सप्तम्यर्थे तस् अव्यं) अग्रे। प्रथमे। तत्पर्य्यायः। पुरतः २ पुरः ३। इत्यमरः॥

अग्रतःसरः, त्रि, (अग्रतः अग्रे सरति गच्छति यः सः अग्रतः + सृ + टः। स्त्रियां ङीप् अग्रतःसरी) (पुरोऽग्रतोऽग्रेषु सर्त्तेः इति पाणिनिसूत्रम्) अग्रगामी। इत्यमरः॥

अग्रदानी, [न्] पुं, (अग्रे दानं प्रेतोद्देशेन तिलादर्पणं ग्राह्यत्वेन विद्यतेऽस्य अग्र + दान + विद्यमानार्थे इन्) पतितब्राह्मणविशेषः। स च प्रेतसम्प्रदानकषड़ङ्गतिलादिद्रव्यग्राही। यथा,—

"लोभी विप्रश्च शूद्राणामग्रे दानं गृहीतवान्।
ग्रहणे मृतदानानामग्रदानी बभूव सः"॥

इति ब्रह्मवैवर्त्तपुराणं॥ तत्पर्य्यायः। आग्रहारिकः २। इति स्मृतिः॥

अग्रपर्णी, स्त्री, (अग्रे पर्णं पत्रं यस्याः सा जातित्वात् ङीप्) अजलोमावृक्षः। इति रत्नमाला॥ आलकुशी इति केचित्॥

अग्रमांसं, क्ली, (अग्रं प्रधानं मन्यते ज्ञायते यत् अग्र + मन् + स। पृषोदरादित्वात् दीर्घः।) हृदयं। इत्यमरः॥ उदरमध्यवर्त्तिमांसवर्द्धनरूपरोगविशेषः। इति वैद्यकं॥

अग्रयानं, क्ली, (अग्रं प्रथमं यानं सेनागमनं) नासीरं। सेनाग्रगमनं। इति हेमचन्द्रः॥

अग्रलोहिता, स्त्री, (अग्रमग्रभागः लोहितं रक्तवर्णं यस्याः सा बहुव्रीहिः) चिल्लीशाकं। इति राजनिर्घण्टः॥

अग्रवीजः, पुं, (अग्रं शाखाग्रं वीजमुत्पत्तिकारणं यस्य सः बहुव्रीहिः। कलम इति भाषायाम्) वीजाग्रवृक्षमात्रं। स च कुरण्टादिः। इति हेमचन्द्रः॥

अग्रसन्धानी, स्त्री, (अग्रे फलभोगात्पूर्ब्बं सन्धीयते अन्विष्यते कार्य्यमनया अग्र + सम् + धा + करणे ल्युट् स्त्रियां ङीप्) यमपञ्जिका। जीवानां शुभाशुभकर्म्मलिखितं यमस्य पुस्तकं। इति त्रिकाण्डशेषः॥

अग्रसरः, त्रि, (अग्रे सरति गच्छति अग्र + सृ + टः।) अग्रेसरः। अग्रगामी। इति हेमचन्द्रः॥ (यथा,—"अग्रसरो जघन्यानां"।) इति भट्टिकाव्ये।

अग्रहः, पुं, (नास्ति ग्रहः गार्हस्थ्याश्रमस्वीकारो यस्य सः बहुव्रीहिः। वानप्रस्थे। नास्ति ग्रहो ज्ञानं यस्य सः।) ज्ञानशून्ये च। वानप्रस्थः। इति त्रिकाण्डशेषः॥ अग्रह इति पाठे गार्हस्थ्याश्रमवहिर्भूतः॥

अग्रहायणः, पुं, (हायनस्य वर्षस्य अग्रः। हस्व व्रीहिकालयोरिति सूत्रेण हा + ल्युट् युक् च।) मासविशेषः। तस्य व्युत्पत्तिर्यथा,—"हायनस्याग्रोऽग्रहायणः निपातनात् परनिपातनत्वञ्च"। इत्यमरटीकायां भरतः॥ मार्गशीर्षमासः। इति शब्दरत्नावली॥ अस्य पर्य्यायः आग्रहायणिके जातफलं तत्कृत्यञ्च मार्गशीर्षे द्रष्टव्यम्॥

अग्राह्यं, त्रि, (न ग्राह्यं ग्रहणीयं ग्रह + कर्म्मणि। ण्यत् ग्रहणायोग्ये) अग्रहणीयं। ग्रहणायोग्यं यथा,—

"अग्राह्यं शिवनैवेद्यं पत्रं पुष्पं फलं जलं।
सालग्रामशिलास्पर्शात् सर्व्वं याति पवित्रतां"॥

इति तिथ्यादितत्त्वं॥

अग्रिमः, त्रि, (अग्रे भवः अग्र + डिमन्) प्रधानं। उत्तमः। इति हेमचन्द्रः॥ ज्येष्ठः। अग्रजः। इति जटाधरः॥

अग्रिमा, स्त्री, (अग्रे भवा अग्र + डिमन्) लवणीफलं। लोणा इति ख्याता। इति शब्दचन्द्रिका॥

अग्रियं, त्रि, (अग्रे भवम् अग्र + घ) प्रधानं। इत्यमरः॥

अग्रियः, पुं, (अग्रे भव अग्र + घ) अग्रजः। ज्येष्ठभ्राता। इत्यमरः॥

अग्रीयं, त्रि, (अग्रे भवः अग्र + छ) प्रधानं। इत्यमरः॥ अग्रजे पुं,। इति तट्टीकायां रमानाथः॥

अग्रुः, स्त्री, (अङ्ग्यते द्रव्यं गृह्यतेऽनया अगि + क्रु ऊङुत इति स्त्रियां वा ऊङ्। निपातनात् नलोपः।) अङ्गुलिः। वेदप्रचुरप्रयोगोऽयं॥

अग्रेगाः, पुं, अग्रगामी। इति मुग्धबोधव्याकरणं॥

अग्रेगूः, पुं, (अग्रे गच्छति यः अग्रे + गम् + क्विप् ऊचगमादीनामित्युपसङ्ख्यानमिति पाणिनिवार्त्तिकेन मलोपः अकारस्य ऊकारः।) अग्रगामी। इत्युणादिवृत्तिः॥

अग्रेदिधिषुः, पुं, (दिधिं धैर्य्यं स्यति इन्द्रियदौर्ब्बल्यात् त्यजति दिधि + सो + अब्धुदृनकूजम्बुकम्बुककेलूककर्न्धूदिधिषु इत्युणादिसूत्रेण कु षत्वञ्च दिधिषुः पुनर्भूर्योषित् अग्रे गणनीया दिधिषुः द्विरूढ़ा स्त्री यस्य सः बहु० हलदन्तात् सप्तम्याः संज्ञायामिति पाणिनिसूत्रेण अलुक् पुनर्भूविवाहकारिणि जने) द्विरूढ़ैव यस्य कुटुम्बिनी स द्विजः। द्वि। इत्युपलक्षणं। दिधिषुः परपूर्ब्बाग्रे दिधिषूस्तत्पुरन्ध्रिकः। इति सामान्येन नाममालादर्शनात्। द्वितीयवारविवाहितपुत्त्रादिमती गृहिणीर स्वामी इति भाषा। इत्यमरः॥

अग्रेदिधिषुः, स्त्री, (प्रागनूढ़ज्येष्ठभगिन्याः प्रागूढ़कनिष्ठभगिन्यां। अग्रे प्रथमे ज्येष्ठायां भगिन्यां विद्यमानायां गणनीया दिधिषुः ज्येष्ठा विवाहकालासहनरूपधैर्य्यलोपकारिणीति विग्रहे शाकपार्थिवादित्वात् समासः मध्यपदलोपश्च।) अविवाहितज्येष्ठभगिनीसत्त्वे अग्रे विवाहिता कनिष्ठा। यथा,—

"ज्येष्ठायां विद्यमानायां कन्यायामुह्यतेऽनुजा।
सा चाग्रे दिधिषुर्ज्ञेया पूर्ब्बा च दिधिषुः स्मृता"॥

इति देवलः। दिधिषूर्दीर्घोकारान्तोऽपि॥

अग्रेवणं, क्ली, (वनस्याग्रे राजदन्तादित्वात् परनिपातः अलुक्। वनं पुरगे आदित्वात् णत्वम्।) वनस्याग्रभागः। इति शब्दमाला॥

अग्रेसरः, त्रि, (अग्रे सरति गच्छतीति अग्रे + सृ + टः।) अग्रे गमनकर्त्ता। तत्पर्य्यायः। पुरोगः २ प्रष्ठः ३ अग्रतःसरः ४ पुरःसरः ५। इत्यमरः॥ अग्रगामी ६ अग्रसरः ७ अग्रगः ८ पुरोगमः ९ पुरोगामी १०। इति हेमचन्द्रः॥

अग्रेसरिकः, त्रि, (अग्रेसरणं गमनम् अग्रे + सृ + भावे अप् अग्रेसरे गमने प्रसृतः अग्रेसर + ठन् अग्रगामिनि।) अग्रगामी। इति त्रिकाण्डशेषः॥

अग्र्यः, त्रि, (अग्रे भवः अग्र + यत्।) प्रधानं। उत्तमः इत्यमरः। ज्येष्ठभ्रातरि पुं इति तट्टीकायां रमानाथः॥

अघ इ ङ गतौ (अघि गतौ कर्म्मणि लट् ते इदितो नुम् धातोरिति पाणिनिसूत्रेण नुम् अङ्घ्यते। कर्त्तरि लट् ते अङ्घते)। निन्दायां। आरम्भे। जवे। इति कविकल्पद्रुमः॥ जवो वेगगतिः। इ अङ्घ्यते। ङ अङ्घते वायुर्वेगेन गच्छतीत्यर्थः। जवे एव कैश्चित् पठ्यते। इति दुर्गादासः॥

अघ त् क तत्कृतौ। इति कविकल्पद्रुमः॥ तत्कृतिः पापकृतिः। अघयति व्याधः। कर्म्मणोऽर्थमध्यपाठादकर्म्मकोऽयं। तथा च,—

"धातोरर्थान्तरे वृत्ते धात्वर्थेनोपसङ्ग्रहात्।
प्रसिद्धेरविवक्षातः कर्म्मणोऽकर्म्मिका क्रिया"॥

इति गोयीचन्द्रः॥ धात्वर्थेन सह कर्म्मण उपसङ्ग्रहादित्यर्थः। क्रमेणोदाहरणानि। नदी वहति क्षरतीत्यर्थः। अघयति व्याधः। भवति घटः। आंहते जनः। इति दुर्गादासः॥

अघं, क्ली, (अघ पापकरणे चुरां अघयति अघ + णिच् + अच्।) पापं। दुःखं। व्यसनं। इत्यमरः॥

अघमर्षणं, त्रि, (अघं पापं मृष्यते उत्पन्नत्वेऽपि नाशनेन कर्म्माक्षमत्वात् सह्यतेऽनेन अघ + मृष् + करणे ल्युट्।) पापनाशनं। सर्व्वपापध्वंसिजप्यं। इत्यमरः॥ (उत्पन्नपापनाशार्थं जप्ये मन्त्रभेदे यथा सन्ध्यामन्त्रे द्रुपदादिवेत्यादि) अश्वमेधयज्ञाङ्गावभृथस्नानमन्त्रः। वैदिकसन्ध्यान्तर्गतमन्त्रकरणकाघ्रातजलप्रक्षेपरूपपापनाशकक्रियाविशेषः। इति स्मृतिः॥ तान्त्रिकसन्ध्यायान्तु,—

"षड़ङ्गन्यासमाचर्य्य वामहस्ते जलं ततः।
गृहीत्वा दक्षिणेनैव संपुटं कारयेद्बुधः॥
शिववायुजलपृथ्वीवह्निवीजैस्त्रिधा पुनः।
अभिमन्त्र्य च मूलेन सप्तधा तत्त्वमुद्रया॥
निःक्षिपेत् तज्जलं मूर्द्ध्नि शेषं दक्षे निधाय च।
इड़याकृष्य देहान्तःक्षालितं पापसञ्चयं॥
कृष्णवर्णं तदुदकं दक्षनाड्या विरेचयेत्।
दक्षहस्ते च तन्मन्त्री पापरूपं विचिन्त्य च॥
पुरतो वज्रपाषाणे निक्षिपेदस्त्रमुच्चरन्"॥

इति तन्त्रसारः॥

अघवान्, [त्] त्रि, (अघं पापं विद्यतेऽस्य अघ + मतुप्) अघविशिष्टः। पापी॥